International Journal of Sanskrit Research 2015; 1(2): 66-71

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2015; 1(2): 66-71
© 2015 IJSR
www.anantaajournal.com
Received: 30-11-2014
Accepted: 10-12-2014

**डा. सुशान्तकुमारराजः**
साहित्यविभागः, राष्ट्रिय-संस्कृत-संस्थानम् (मा.वि),
श्रीसदाशिवपरिसरः पुरी, ओडिशा, भारत।

**Correspondence**
**डा. सुशान्तकुमारराजः**
साहित्यविभागः, राष्ट्रिय-संस्कृत-संस्थानम्(मा.वि),
श्रीसदाशिवपरिसरः पुरी, ओडिशा, भारत।

# स्वामिभगवदाचार्यस्य संस्कृतसाहित्ये योगदानम्

**डा. सुशान्तकुमारराजः**

**प्रस्तावना**

संस्कृतसाहित्यमित्युक्ते वैदिककालादारभ्य आधुनिककालपर्यन्तं संस्कृतभाषया विरचितानि नैकविधानि काव्यानि शास्त्राणि चेति अवगम्यते । अतः साहित्यं वैदिकं लौकिकञ्चेति द्विधा विभज्यते । लौकिकं साहित्यमपि प्राचीनसाहित्यं मध्ययुगीयसाहित्यम् आधुनिकसाहित्यं चेति रूपेण विभाजीक्रियते । प्राचीनकाले यथा कालिदस-भारवि-माघप्रमुखाः महाकवयः तेषामलौकिककृतिसमूहबलेन अमराः सन्ति, तथैव आधुनिककालेऽपि केचन स्वनामधन्याः महाकवयः स्वकीयरचनाबलेन सर्वेषां जनानां मानसपटलेषु विराजमानाः सन्ति स्थास्यन्ति च । एतेषु आधुनिकविद्वद्वरेषु रामानन्दसम्प्रदायस्य प्रमुखाचार्यत्वेन प्रतिष्ठितः कविकर्णधारः परिव्राजकस्वामिभगवदाचार्यः अन्यतमोऽस्ति । विविधविद्याविद्योतितान्तःकरणोऽयम् एकाधारेण वेदवेदान्तदर्शनपुराणधर्मशास्त्रज्योतिषादिशास्त्रज्ञमहाकवीश्वरश्च आसीदिति तज्जीवनचरितपर्यालोचनेन ज्ञायते । आधुनिककविवरेषु असौ महाकविः विशिष्टप्रतिभायाः अधिकारी आसीदिति तन्निरूपितानां महाकाव्यानां पर्यालोचनेन ज्ञायते । कविवरोऽयं यद्यपि परमवैष्णवः आसीत् तथापि स्वाधिनतासंग्रामिणः महात्मगान्धेः परमभक्तः आसीत् । अतः तस्य गान्धिमहात्मनः जीवनचरिताधारेण त्रीणि महाकाव्यानि यथा- भारतपारिजातम्, पारिजातसौरभम्, पारिजातोपहारश्चेति । गुरोः श्रीरामानन्दाचार्यस्य जीवनवृत्तमाधारेणापि श्रीरामानन्ददिग्विजयम् इति नाम एकं विशिष्टमहाकाव्यं विरचितम् । साहित्य-व्याकरण-न्याय-मीमांसा-वेदावेदान्तादिषु अनेनशास्त्रेषु कृतभूरिपरिश्रमस्यास्य महात्मनः अतिविचित्रचतित्रमाधारीकृत्य प्रबन्धोऽयं विनिर्म्यते, येनास्य विद्याविनयादिक्षेत्रे परममहत्त्वं सर्वेषां विद्वज्जनानां गोचरीभूतं भविष्यतीति मे मति । महाकविरयं बहुशास्त्राणि अधीत्य ततः सारान् संगृह्य च श्रीरामानन्दसम्प्रदायस्य मूलतत्त्वं समुद्घाटितवान् । महन्तश्रीरामदासस्य मतानुसारं श्रमद्भगवदाचार्यः श्रीवष्णवसम्प्रदायस्य एको महार्घरत्नमस्ति[1] ।

स्वामिश्रीमद्भगवदाचार्यः आजन्मब्रह्मचारी आसीत् । असौ पञ्जावप्रदेशस्य स्यालकोट इति नाम्नि नगरे कान्यकुब्जब्राह्मणकुले जन्म लेभे । अयं गङ्गादत्तत्रिपाठिनः औरसात् तथा मारक्षीदेव्याः गर्भे द्वितीयसन्तानरूपेण समुत्पन्नोऽभूत् । अस्य पितृदत्तनाम सर्वजीत इति आसीत् ।अस्य सर्वजीतः पूर्वजाः सप्तपञ्चाशदधिकाष्टादशशततमे (1857) ख्रीष्टाब्दे आंलोजनैः प्रपीडिताः सन्तः उत्तरप्रदेशस्य देवकलीति स्थानात् पञ्जाबं प्रति आगतवन्तः। अस्य पिता पौरहित्यकर्मणि स्वजीविकां निर्वहतिस्म । पितुः गङ्गादत्तस्यापि द्वौ भातरौ च आस्ताम् । तयोः पण्डतश्रीराममौलित्रिदेवी ज्येष्ठः आसीत् ।

स ज्येष्ठभ्राता स्वधर्मपत्न्या सह काशीनगरे न्यवसत् । तौ अनपत्यौ आस्ताम् अतः कनिष्ठभ्रातुः सर्वजीत इत्यस्य लालनपालनदायित्यं गृहीतवन्तौ ।

सर्वजीतः देवेन्द्रनाम्ना अपि एकः अग्रजः आसीत् । स रावडपिडीति नगरे पौरोहित्यं कर्म कृत्वा कालमयापयत् । सर्वजीतः उपरि तस्य स्नेहाधिक्यमवर्तत । सर्वजीतः प्राथमिकशिक्षायाः भारं स स्वयमेव गृहीतवान् । अतः स कनिष्ठभ्रातरं सर्वजीतं सस्नहं संस्कृतं, फारसी, उर्दुश्चेत्यादिभाषाः बोधयामास । यतोऽयं ज्येष्ठभ्राता ज्योतिषशास्त्रे निपुणः आसीत् अतः सर्वजीतमसौ शीघ्रबोधः मुहूर्तचिन्तामणिः चेति नामकौ द्वौ ज्योतिषग्रन्थौ पाठयामास । त्रयोदशतमे वर्षे वयसि यदा सर्वजीतः पूर्णसंस्कृताध्ययनस्य आग्रहं प्रदर्शितवान्, तदा ज्येष्ठभ्राता देवेन्द्रः कनिष्ठेन सह स्वयमपि काशीनगरीं गत्वा तं संस्कृतं पाठयामास । काश्यां स्थितावस्थायां तस्य मातुः मारक्षीदेव्याः देहावसानम् अभवत् । सा अपि अन्तिमे काले सर्वजीतः पालनभारं ज्येष्ठस्योपरि स्थापितवती । ज्येष्ठोऽपि अमुं भारं कर्तव्यनिष्ठतया वहनमकरोत्[2]। स्वामिभगवदाचार्येणापि स्वजीवनचरिते ग्रन्थे स्पष्टमेवोक्तम्- मम हृदि संस्कृतभाषायाः बीजं ज्येष्ठभ्रात्रा एव निक्षिप्तम्[2] इति।

**सर्वजीतः वैराग्यम्-**

अस्य सर्वजीतः चतुर्दशवर्ष वयसि काशिविश्वविद्यालये क्रमशः वैराग्यं समारब्धम्। एकदा अनध्यायदिवसे स्वीयैः सहपाठिभिः सह गगातटस्थं राजघाटं प्रति भ्रमणाय गतवान्। तदा तत्र तेन कस्यचन महात्मनः दर्शनं कृतम् । तस्य महात्मनः त्यागपूतजीवनचर्यया अयं दृढतरः आकृष्टोऽभवत् । तदा तस्य हृदये त्यागभावः जागृतोऽभूत् । यदा कस्यचन मत्तसारमेयस्य दन्ताघातप्राप्तविषप्रवाहः शरीरस्य प्रत्येकरक्तकणिकायां झटितिरेव जायते, तथैव दृष्टस्य महात्मनः त्यगपूतजीवनचर्यावलोकनेन अनुभूतं वैराग्यमिदमस्य जीवनं प्रभावयतिस्म। यथोक्तं स्वयमेव स्वजीवनचरितग्रन्थे- आत्मर्कं विषमिव सर्वतः प्रसृप्तम्[3] इति । एतेन अस्य संस्कृताध्ययनादिकं बाधितमभूत् । सर्वजीतः तादृशं व्यवहारं दृष्ट्वा यदा ज्येष्ठभ्राता तस्मै पृष्टवान् तदा सः सर्वमेव सत्यम् उक्तवान् । कियद्दिनानन्तरं तस्य पुरः संस्कृताध्ययनस्य कृते इच्छा संजाता ततः तदेव स कृतवान् इति ज्ञायते ।

तदा संस्कृताध्ययनसमये मित्रवर्यस्य गङ्गादत्ताख्यस्य परामर्शबलेन एष आर्यसमाजी अप्यभवत्। आर्यसमाजपक्षतः स शास्त्रार्थमपि विभिन्नेषु स्थलेषु अकरोदिति स्वयं प्रकाशयतिस्म । अस्मिन् समये अयमाचार्यः भवदेवब्रह्मचारी[4] ति नाम्ना सुख्यातोऽभूत् । अनेन कर्मणा स इत्थं निमग्नोऽभवत् येन तस्य पारिवारिकसम्बन्धोऽपि विच्छिन्नोऽभूत् ।

**तस्य श्रीवैष्णवपरिवारः-**

समयानुक्रमेणायं भवदेवब्रह्मचारी अयोध्यानगरीं गत्वा रामानन्दसम्प्रदायस्य अनुगामिभिः वैष्णवैः सह सम्पर्कं स्थापयामास । ततः वैष्णवजनैः सह जातमेलनम् अत्यन्तं प्रीतिकरमभूत् । क्रमशः असौ भारतवर्षस्य स्वाधीनताप्राप्तये समायोजितस्य आन्दोलनस्य भारं गृहीतवान् । तदा आरक्षिणां त्रासात् स्वरक्षणायै सन्यासग्रहणाय निश्चयामास । अतः पण्डितश्रीरघुनाथदासस्य प्ररोचनया स्वाधीनतासंग्रामी अयं बडास्थानस्य श्रीमहन्तमहाराजस्य समीपं गत्वा ततः वैष्णवसन्यासपरम्पराधारेण दीक्षितोऽभवत् । ततोऽयं भवदेवाचार्यब्रह्मचारीति नाम्ना वैष्णवेषु ख्यातोऽभूत् । तस्य गुरोः सम्पूर्णं नाम महन्तश्रीराममनोहरदासमहाराजः इति आसीत्। तदुक्तं अयोध्याकाण्डे, यथा-

> रामप्रसादमाचार्यं चन्द्रविम्बमिवानलम् ।
> नमामि शिरसा वन्द्यं ध्रुवविन्दुं सपुण्डकम्।।[5] इति।

**भगवदाचार्यस्य देशः-**

भगवदाचार्यः भारतवर्षर्य नैकस्थाने निवासमकरोदिति तज्जीवनचरितस्याध्ययनेनावगम्यते । पञ्जावप्रदेशस्य स्यलकोट इति नगरे लब्धजन्मा असौ काशीनगरे स्वबाल्यकालं यापयित्वा विरागवशात् आजन्मब्रह्मचारी अभवत्। ब्रह्मचर्यावलम्बनानन्तरं स आदौ आर्यसमाजे दीक्षितो भूत्वा विहारप्रदेशस्य दरभङ्गा इति स्थाने स्थितवान् । ततः बडास्थानमहन्तमहाराजस्य शिष्यो भूत्वा तत्र नाल्पदिनं स्थितवान् । ततः छावणीमठे च बहुवर्षाणि यावत् उषितवान्। अयोध्यानगरेऽस्मिन् स्थानद्वये स्थित्वा अयमाचार्यः स्वप्रतिभायाः विकासमकरोत् ।

अस्य महात्मनः अन्तिमसमयो गुर्जरप्रदेशे व्यतीतम् । गुर्जरप्रदेशेऽसौ परचत्वारिंशद् वर्षाणि स्थितवान् इति स्वामिभगवदाचार्येण सह प्रत्यक्षसम्पर्कितस्य पुरीस्थितबलरामकोटमठाधीश्वरस्य डा.अयोध्यादासमहाराजस्य मुखकमलादवगतम् । अहमदावादस्थे राजनगरसोसायटीति स्थाने स्वप्रतिष्ठिताश्रमे अस्य महाप्रयाणमभवदिति ज्ञायते। इदानीं तत्स्तानं स्वामिभगवदाचार्यस्मृतिकुञ्जमिति नाम्ना प्रसिद्धमस्ति ।

**भगवदाचार्यस्य कालः-**

स्वामिभगवदाचार्यस्य कालनिर्णये प्रसङ्गे विदुषां न कोऽपि संशयो वर्तते । आचार्योऽयं जातीयपितुः महात्मगान्धेः समसामयिकः आसीदिति तदवचनाज्ज्ञायते। तस्य जन्मतिथिरपि प्राप्यते।स अशीत्यधिककाष्टादशशततमे (1880) खीष्टाब्दे कार्त्तिकमासे कृष्णगोपञ्चमीतिथौ जन्मग्रहणम् अकरोत्[6] । पुनश्चायं भगवदाचार्यः परशतवर्षवयसि कार्त्तिकमासस्य शुक्लगोत्रयोदश्यां तिथौ शरीरत्यागमकरोदिति।

**भगवदाचार्यस्य वैदुष्यम्-**

सर्वतन्त्रस्वतन्त्रकवितार्किकपरमहंसपरिब्राजकस्वामिश्रीमद्भगवदाचार्यः अनन्तप्रतिभायाः अधिकारी आसीत्। अस्य वैदुष्यं नैकस्थलेषु समुपलभ्यते । अतः प्रसङ्गेऽस्मिन् नैकस्थलेषु समुपलब्धानां श्रीमद्भगवदाचार्यवैदुष्याणां संक्षिप्तोपस्थापनं क्रियते ।

**1. बहुभाषाज्ञानम्-**

श्रीमद्भगवदाचार्यः न केवलं संस्कृतभाषायां हिन्दीभाषायां वा निपुणः आसीत् अपि तु मागधी-प्राकृत-फारसी-उर्दु गुजराटी-अंग्रेजी-वाङ्लाप्रभृतीनां भाषाणां महान् विद्वान् आसीद् इति ब्रजविहारीशरणस्य[7] वचनाद् ज्ञायते । एतासु कतिपयभाषासु अपि स्वामिभगवदाचार्यप्रणीता ग्रन्थाः अपि समुपलभ्यन्ते । स्वस्य विभिन्नदेशभ्रमणं तत्र तत्र प्रचलितभाषाज्ञानविषयश्चायं स्वजीवनचरिते ग्रन्थे बहुवारं लिखितवान्[8]।

**2. वैदिकज्ञानम्-**

वैदिकसाहित्ये स्वमिनः गभीरप्रवेशः आसीदिति तस्य वैदिकभाष्याणामनुसन्धानतः ज्ञायते । स कलिकतायाः खदिरपूरमहाविद्यालयात् वेदरत्नः इति उपाधिपरीक्षायामुत्तीर्णोऽभूदिति स्वामिभगवदाचार्यग्रन्थतोऽवगम्यते । आर्यसमाजस्थितबेलायां स ऋग्वेदभाष्यस्य काल्पनिकत्वं खण्डयित्वा स्वविद्वत्तायाः परिचयं दत्तवान् । अयमाचार्यः बहुस्थानं गत्वा वेदनिन्दुकैस्सह शास्त्रार्थमकरोत्। एकदा कैलेण्डरसाहेव इत्याख्यः कश्चन व्यक्तिविशेषः फैजावादगिरिजागुहमागत्य वेदस्य निस्सारत्वं प्रतिपादितवान्। तत्र शास्त्रार्थसंग्रामे तं पराजित्य भगवदाचार्यः पण्डतजनानां प्रशंसाभाजोऽभवत्[9] । तदा तत्र आनन्दभाष्यस्य काल्पनिकत्वं खण्डयित्वा स्वकीयवैदिकविद्वत्तायाः परिचयं दत्तवान् ।

वेदानाम् उपनिषदां चाधारेण तेन अनेके ग्रन्थाः विरचिताः सन्ति। तेषु तस्य सामवेदभाष्योपरि शुक्लयजुर्वेदस्योपरि च लिखितं संस्कारभाष्यद्वयं स्वतन्त्रं मौलिकमपूर्वञ्चास्ति । इत्थं प्रकारेण भाष्यं यथा पूर्वं न दृष्टमिति वेदविदः पण्डितश्रीदामोदरसातबलेकरमहोदयस्य अभिमतमस्ति[10] । भगवदाचार्येण प्रणीतं वेदान्तदर्शनस्य वैदिकभाष्यमपि सम्पूर्णं मौलिकमस्ति । पुनश्चायं महात्मा श्रीसम्प्रदायस्याधारेण दशोपनिषदां संस्कृतभाषायां हिन्दीभाषायां च भाष्याणि लिखितवान् । एतेन चास्य वैदिकशास्त्रीयवैदुष्यं सुविदितमेव ।

**3. व्याकरणशास्त्रीयज्ञानम्-**

स्वामिभगवदाचार्यः पाणिनीयव्याकरणशास्त्रस्य प्रसिद्धः विद्वान् आसीत् । सः काश्यां स्थित्वा लघुसिद्धान्तकौमुदीम् अधीतवान्। बांकीपुरविद्यालये आचार्यश्रीरामनारायणगुरोः सम्पूर्णं सिद्धान्तकौमुदीम् अधीतवान् । पुनः स्वामिश्रीसरोजदासमहाराजसमीपात् परमलघुमञ्जूषा वैयाकरणमहाभाष्यञ्चेत्यादीनि पुस्तकानि पठित्वा स परमवैयाकरणोऽभवत् । परमवैयाकरणस्वामिभगवदाचार्यः नूतनशैल्या व्याकरणशास्त्रम् अध्यापने निपुणः आसीत्। पाणिनीयव्याकरणे प्रचलितानां काल्पनिकतत्त्वानां खण्डनमपि तेन कृतम् । यथा- पाणिनिमुनः शैवः इति लोकप्रसिद्धिः अस्ति। परन्तु पणिनिः वैष्णवः आसीदिति स्वामिभगवदाचार्येण प्रमाणीकृतम् । जयादित्तस्य अष्टाध्यायीटीकागतस्य नृत्तावसानेत्यादि श्लोकस्य आधारेण उपस्थापितं मतमपि तेन विखण्डितम् । तन्मतानुसारेण पाणिनिमुनिना माहेश्वरसूत्रावल्याः प्रथमे सूत्रे आदौ विष्णुपरकस्य ११अ"वर्णस्य पाठः कृतः। ततः लक्ष्मीपरकस्य ११इ"वर्णस्य पाठः कृतः । तदनन्तरं शिवपरकस्य ११उ" वर्णस्य पाठः कृतः। पाणिनिः शैवः अभवच्चेत् स माहेश्वरसूत्रेषु प्रथमसूत्रं ११उअइण्" इति कृतवान् स्यात् ।

पुनश्च शिवस्य डम्बरुशब्दात् चतुर्दशसूत्राणि समायातानीति यन्मतमस्ति, तदपि भगवदाचार्येण खण्डितम् । प्रसङ्गेऽस्मिन् स प्रतिपादयति यत् पाणिनेः पूर्ववर्त्तिभिः वैयाकरणैः अवर्णादिवर्णमाला प्रस्तुता आसीत् । ताषां वर्णानां प्रत्याहारसूत्रमपि पूर्वमासीत् । परिशेषे आचार्येण उक्तं यत् चतुर्दशमाहेश्वरसूत्रग्रहणे पाणिनिः शैव इति एषा व्यवस्था स्वीक्रियते चेत् पणिनेः तन्मेधायाश्चापमानं भविष्यति । पुनश्च तेन शेखरोक्तं चतुर्दशसूत्राणां श्रुतिमूलात्मकं मतं खण्डितम्[11] ।

**4. दर्शनशास्त्रीयज्ञानम्-**

स्वामिभगवदाचार्यः दर्शनशास्त्रेषु अपि अचिन्तनीयपाण्डित्यमर्जितवान् । सर्वशास्त्रवित् पण्डितश्रीहरदत्तत्रिवेदी तस्य दर्शनशास्त्रीयगुरुः आसीत् । तस्माद्गुरोः अयमाचार्यः पञ्जाबस्य शास्त्रीपरीक्षायाः सर्वग्रन्थैः सह न्यायदर्शनस्य वात्सायनभाष्यम्, न्यायकुसुमाञ्जलिः, न्यायसिद्धान्तमुक्तावली, सांख्यदर्शनम्, योगदर्शनम्, मीमांसादर्शनं चाधीतवान्[12]। दरभङ्गायाः रामेश्वरलालविश्वविद्यालयस्य न्यायाध्यापको महामहोपाध्यायः श्रीबालकृष्णमिश्रः भगवदाचार्यं नव्यन्यायदर्शनं पाठयामास । पुनश्चायम् आचार्यः रामानन्दविशिष्टाद्वैतसम्प्रदायस्यानुगतः आसीत् । अतः विशिष्टाद्वैतवेदान्तेऽस्य अनवद्यप्रवेशः आसीदिति तेन प्रणीता विशिष्टाद्वैतदर्शनम्, त्रिरत्नी, दशोपनिषद्भाष्यम्, सामवेदसंस्कारभाष्यं चेत्यादिग्रन्थाः प्रमाणमावहन्ति । दार्शनिकाचार्योऽयं वेदान्तदर्शनस्य वैदिकभाष्यं विरच्य आदिशङ्कराचार्येण सह तुलनीयोऽभवत् । एतद्भाष्यं जगद्गुरोः भाष्यादपि श्रेष्ठमिति स्वयं स्वीकृतवान्[13]।

**5. ज्योतिषशास्त्रीयज्ञानम्-**

स्वीयज्येष्ठभ्राता भगवदाचार्यस्य प्रथमज्योतिषगुरुः इति पूर्वं प्रतिपादितम् । तस्मात् स शीघ्रबोधः, मुहूर्तचिन्तामणिश्चेति

द्वौ ज्यौतिषग्रन्थौ पठितवान् । यद्यपि स ज्यौतिषशास्त्रे आचार्यः इति पदवीं नैव प्राप्तवान् तथापि तस्मिन् शास्त्रेऽपि तस्य पाण्डित्यमासीत् । तेन प्रणीताः नक्षत्राणि, संख्या इत्यादिशीर्षकोपेताः प्रबन्धाः तस्य ज्योतिषशास्त्रीयज्ञानस्य परिचायकाः सन्ति ।

**6. छन्दोज्ञानम्-**

स्वामिभगवदाचार्यस्य नानाविधरचनासु त्रिंशदधिकानि छन्दांसि व्यवहृतानि सन्ति । तेन केवलं भारतपारिजातमहाकाव्ये सप्तविंशतिः छन्दांसि प्रयुक्तानि सन्ति । तानि सर्वाण्यपि छन्दांसि काव्यशास्त्रीयनियमाधारेण च व्यवहृतानि सन्ति ।

महाकविर्भगवदाचार्यः आशुकविरासीत् । काशीनगरे एकस्यां महासभायां साभापत्यभाषणं छन्दोबद्धसंस्कृतश्लोकैरेव समुपस्थापितवान् । किञ्च स यतीन्द्रविंशतिरिति जगद्गुरोः श्रीरामानन्दाचार्यस्य सूक्तिश्लोकान् एकस्यां रात्रावेव विरचितवान् । कविवरोऽसौ शतावधानी अप्यासीत् ।

**7. काव्यशास्त्रीयज्ञानम्-**

शास्त्रान्तरवदयं भगवदाचार्यः काव्यशास्त्रीयालौकिकप्रतिभायाः अधिकारी आसीत् । तस्य साहित्यशास्त्रीयगुरुषु श्रीरामावतारशर्ममहोदयः श्रीहरिदत्तत्रिवेदी च प्रमुखौ आस्ताम् । महाकविनाऽनेन विरचितानि अलङ्कारशास्त्रानुरूपाणि काव्यानि तस्य काव्यशास्त्रीयज्ञानस्य परिचायकानि भवन्ति । तत्प्रणीतेषु सर्वकाव्येषु काव्यलक्षणं समन्वितं भवति। काव्यशास्त्रीयनियमाधारेण
गुणरीतिवृत्तिरसध्वन्यलङ्कारादिकाव्यतत्त्वानां समावेशेन तस्य काव्यनि कालिदासभारविमाघादिविरचितप्रमुखकाव्यसमुहैः सह तुल्यानि भवन्ति । अतौऽयं न केवलं महाकविरासीत् अपितु आसीत् एक परमकाव्यशास्त्रीत्यत्र नास्ति काऽपि संशितः।

**8. धर्मशास्त्रीयज्ञानम्-**

भगवदाचार्यस्य दिनचर्या धर्मशास्त्रानुसारिणी आसीत् । धर्मशास्त्रस्य अनध्यायप्रकरणोक्ताः अनध्यायदिवसाः तस्य चतुर्दशवर्षवयसि काशीनिवाससमये स पालितवान् इति स्वस्य जीवनचरितग्रन्थमाध्यमेन ज्ञायते । तेन विरचितायां लेखरत्नमञ्जूषायां बलवाटीकायां च बहुविधधर्मशास्त्रीयप्रबन्धाः समुपलभ्यन्ते । तेन प्रणीतमहाकाव्येषु विद्यमानाः सूक्तयः धर्मशास्त्रीयतत्त्वाधारेण विनिर्मिता इति अनुभूयत् ।

**9. पौराणिकज्ञानम्-**

भगवदाचार्यस्य काव्यरचनासु विविधाः पौराणिकीकथाः समुपलभ्यन्ते। भारतपारिजातमहाकाव्यस्य प्रथमे सर्गे सुदामापुरीवर्णनप्रसङ्गे सुदाम्नः पौराणिकविषयः सुविस्तरं वर्णितः, यथा-

> महदरिद्रो द्विजराजवंशजः सुतस्य नन्दस्य सतीर्थपेशलः।
> उवास तत्रैव तपस्वितां बहन् सुदामनामा सहभार्ययो रजे।।[13] इति।

दशरथमोक्षः, श्रीरामेश्वरमीमांसा, उत्तराकाण्डविमर्शः,वाल्मीकिसंहिता, श्रीवाल्मीकिरामायणी प्रस्तावना चेत्यादयः अनेके पौरणिकग्रन्था तेन यथा विरचिताः सन्ति, तथैव वाल्मीकिमुनेः आदिकवित्वम्, महाभारतकालीनचर्चा, श्रीमद्भागवत और पुनर्जन्म, रामायणकथा चेत्यादयः तन्निर्मिताः पौराणिकप्रबन्धाः तस्य पौराणकज्ञानस्य परिचायकाः सन्ति।

**10. अपरा विशिष्टविद्वत्ता-**

स्वामिभगवदाचार्यः न केवलं सर्वशास्त्रविद्विद्वानासीत् स चासीत् विशिष्टशक्तीनाम् अधिकारी । ताः शक्तयः उत्तममानवेषु कदाचिदवलोक्यन्ते । ताषां शक्तीनां संक्षिप्तविवरणमत्र प्रस्तुयते-

अस्य महात्मनः द्रुतलेखनशक्तिः आसीत् विशिष्टशक्तिषु अन्यतमा । द्रुतलिखनप्रतियोगितायां विद्वद्वरोऽयं समकालमेव द्वाभ्यां हस्ताभ्यां विषयद्वयमपि अतिप्रखरगत्या लिखतिस्म[15] । हस्तद्वयेन लिखनयोग्यता न कुत्रापि अवलोक्यते अतः तस्य इयं विशिष्टा शक्तिरिति ।

भगवदाचार्यस्य धीशक्तिः अतीवप्रखरा आसीत् । शतसंख्यकान् विषयान् प्रति तस्य समकालीनं ध्यानम् आसीत् । सभास्थले शतसंख्यकैः विद्वद्भिः समकालमेव कृतानां स्वतन्त्रविषयाधारितप्रश्नानां समाधानात्मकमुत्तरं स समकालमेव दातुं समर्थः आसीत् । अतोऽयं शतावधानी इति रूपेण परिचितोऽभवत् । इत्येवास्य प्रत्युत्पन्नमतितायाः परिचयः ।

अयं महात्मा स्वकीयविद्वत्तया सर्वजनान् सन्तोषयामास । अहम्मदावादे निवाससमये तस्य छात्राः, दर्शकाः, गवेषकाश्च समुपस्थिताऽभवन् । न केवलं रामानन्दिसम्प्रदायस्य वैष्णवाः अपि तु सर्वसम्प्रदायस्य जनाः एतस्य कृते सम्मानं प्रकटीकुर्वन्तिस्म ।

स्वामिभगवदाचार्यः वाग्मीरन्यतमश्चासीत् । स्वस्य वैदुष्यपूर्णभाषणस्य श्रवणाय देशान्तरेषु अपि अनेके विद्वांसः तम् आमन्त्रयामासु । तस्य महात्मनः सर्वशास्त्राध्यापनयोग्यता आसीत् । एकस्मिन् विद्यालये अध्यापनं कृत्वाऽयं लब्धयशाऽभूत् । अस्य अध्यापनं केवलं धनोपार्जनाय न भूत्वा शिष्यज्ञानाय, धर्मप्रचाराय, समाजकल्याणाय चासीत्।

आचार्योऽयं शास्त्रार्थनिपुणः आसीत् । छात्रजीवनादारभ्य अन्तिमसमयं पर्यन्तं विविधधार्मिकसमस्यानां शास्त्रीयसमस्यानां च समाधानाय विविधस्थलं गत्वा शास्त्रार्थं कृतवान् । रामानन्दसम्प्रदायस्य रक्षणाय विविधे स्थाने

तुमूलशास्त्रार्थसंग्रामान् अकरोत् । स श्रीहनुमानगढशास्त्रार्थमहासभायां श्रीरामानन्दसम्प्रदायस्य रक्षणार्थं स्वगुरुणा सह अपि शास्त्रार्थं चकार[16] । पुनश्चास्य सम्प्रदायस्य पूर्णसफलताप्राप्तये अयं महात्मा उज्जैनकुम्भमेलायां विपक्षिविद्वज्जनैः सह शास्त्रार्थमकरोत् । अयं स्वजीवनकालमध्ये एकचत्वारिंशत्(41) स्थानेषु शास्त्रार्थान् कृत्वा दिग्विजयी अभवत्। एवं हि श्रीमद्भगवदाचार्यः अखण्डविद्वत्तायाः अधिकारी आसीदित्यत्र नास्ति काऽपि विप्रतिपत्तिः।

**भगवदाचार्यस्य कृतयः**

**साहित्य-**

व्याकरणन्यायमीमांसावेदान्तोपनिषद्धर्मशास्त्रपुराणेतिहासादिषु कृतभूरिपरिश्रमस्य श्रीरामानन्दस्वामिभगवदाचार्यस्य विविधाषु भाषासु शताधिकसंख्यकाः प्रकाशितग्रन्थाः समुपलभ्यन्ते । तेषां ग्रन्थानां वर्गीकरणं निम्नोक्तरीत्या कर्तुं शक्यते- यथा- 1. वैदिकग्रन्थाः, 2. दार्शनिकग्रन्थाः, 3. पौराणिकग्रन्था, 4. वैष्णवग्रन्थाः, 5. स्तुतिग्रन्थाः, 6. काव्यानि, 7. मौलिकग्रन्था चेति।

**क.) वैदिकग्रन्था-**

1. सामवेदसंहितायाः सामसंस्कारभाष्यम्। 2. शुक्लयजुर्वेदसंहितायाः शुक्लयजुर्वेदसंस्कारभाष्यम्। 3. यजुर्वेद-सामवेदभाष्यप्रस्तावना । 4. ईशावास्योपनिषद्भाष्यम् । 5. केनोपनिषद्भाष्यम् । 6. कठोपनिषद्भाष्यम् । 7. प्रश्नोपनिषद्भाष्यम् । 8. मुण्डकोपनिषद्भाष्यम् । 9. माण्डुक्योपनिषद्भाष्यम् । 10. तैत्तिरीयोपनिषद्भाष्यम् । 11. ऐतरेयोपनिषद्भाष्यम् । 12. छान्दोग्योपनिषद्भाष्यम् । 13. बृहदारण्यकोपनिषद्भाष्यम्। 14. वेदविषयकप्रश्नोत्तरी । 15. श्रुतिवाक्यविवृत्तिः। 16. अथर्ववेद में अयोध्याजी चेत्यादिग्रन्थाः सुप्रसिद्धाः सन्ति।

**ख) दार्शनिकग्रन्था-**

1. विशिष्टाद्वैतदर्शनम् । 2. आनन्दभाष्यानुवादः । 3. वेदान्तदर्शनस्य वैदिकभाष्यम्। 4. ब्रह्मसूत्रस्य वैदिकभाष्यम्। 5. वेदान्तदर्शनस्य औपनिषद्भाष्यम् । 6. श्रीमद्भगवद्गीतायाः भगवद्भाष्यम्। 7. वेदान्तिनो अभ्यासः। 8. श्रीमद्भगवद्गीतायाः गुजराटभाषाषाम् अनुवादः चित्यादिग्रन्था भगवदाचार्यप्रणीताः दार्शनिकग्रन्थाः सन्ति ।

**ग) पौराणिकग्रन्थाः-**

1. दशरथमोक्षः, 2. श्रीरामेश्वरमीमांसा, 3. उत्तराकाण्डविमर्शः, 4. वाल्मीकिसंहिता, 5. श्रीबाल्मीकिरामायणम् । 6.श्रीवाल्मीकिरामायण का स्वाध्याय, 7. श्रीबाल्मीकिरामायणी प्रस्तावना। 8. वाल्मीकिरामायणस्य गुजराटभाषानुवाद, 9. श्रीमद्भागवतविमर्शः चेत्यादिग्रन्थाः दर्शनशास्त्रीयग्रन्थाः सन्ति।

**घ) वैष्णवग्रन्थाः-**

आश्रमकण्टकोद्धारः, 2. भक्तिभागिरथी, 3. श्रीसम्प्रदायरक्षा, 4. मूर्तिपूजारहस्यम्, 5. परम्परापरित्राणः, 6. यतिधर्मसमुच्चयः, 7. स्वामी रामानन्दाचार्यजी महाराज, 8. श्रीराममहायज्ञपद्धतिः, 9. भक्तिशास्त्रम्, 10. राममन्त्रपरम्परा की प्रस्ताव, 11. विभूतिधारणविचारः, 12. प्रकाशः, 13. भगवत्पूजनपद्धतिः, 14.श्रीरामपटलः, 15. श्रीरामपटलटीका, 16. वर्णविचारः, 17. श्रीसम्प्रदाय और अस्पृश्यस्पर्श, 18. तत्त्वप्रकाशः, 19. तत्त्वोद्बोधनमीमांसा, 20. श्रीभाष्यम्, 21. श्रीसम्प्रदायसमयः, 22. तत्त्वदर्शी, 23. भक्तिसर्वश्वम्, 24. श्रीवैष्णवमताब्जभास्करटीका, 25. पुरुषोत्तमप्रणयः, 26. आनन्दप्रभा, 27. प्रस्तुतप्रसङ्गभङ्गः चेत्यादिग्रन्थाः वैष्णवग्रन्थाः सन्ति।

**ङ) स्तोत्रग्रन्थाः-**

1. श्रीमद्योतीन्द्रविंशतिः, 2. श्रीयतिराजभङ्गम्, 3. श्रीयतिराजस्तवराजः, 4. सप्तस्तवी, 5. भक्तकल्पद्रुमः, 6. प्रसन्नकल्पद्रुमः, 7. दिव्यदर्शनम्, 8. मातृस्तवः, 9. भगवत्स्तुतिः, 10. श्रीभगवत्स्तवः, 11. मारुतिस्तवः, 12. स्तुतिकुसुमाञ्जलिः, 13. श्रीलोकोत्तराम्बचरणाश्रयम्, 14. भगवत्स्तवरत्नमञ्जूषा, 15. तत्त्वार्थपञ्चकम्, 16. भगवद्रामचरितामृतम्, 17. चतुष्पदी, 18. शारदास्तोत्रम्, 19. हिन्दीस्तुतिकुसुमाञ्जलिः, 20. पुरुषसूक्तम्, 21. प्रेमपीयूषप्रवाहः, 22. स्वराज्यानुभवः, 23. पुरुषोत्तमप्रणयः, 24. भक्तसर्वस्वम् चेत्यादयः स्तोत्रकाव्यानि।

**च) महाकाव्यानि-**

1.श्रीरामानन्ददिग्विजयमहाकाव्यम्, 2. भारतपारिजातमहाकाव्यम्, 3. पारिजातसौरभमहाकाव्यम्, 4. पारिजातापहारमहाकाव्यम्, 5. भारतभस्करोदयमहाकाव्यं चेति पञ्चमहाकाव्यानि भगवदाचार्येण विरचितानि सन्ति ।

**छ) मौलिकग्रन्था-**

1. बालवाटिका, 2. लेखरत्नमञ्जूषा, 3. नीरक्षीरविवेकः, 4. गुर्जरशब्दानुशासन, 5. सिंहावलोकनम्, 6. प्रकाश के कुछ किरण, 7. आफ्रिका में प्रवचन्, 8. आनन्दप्रभा, 9. आर्यावर्त का गुरुत्व, 10. हीरकजयन्ती पर 75 उपदेश, 11. रसस्योद्घाटनम्, 12. स्वामी भगवदाचार्य (5 भाग) चेत्यादयः प्रकाशिताः मौलिकग्रन्थाः ।

**प्राप्ताः उपाधयः, सम्मानाभिनन्दनपत्राणि च**

परमहंसपरिव्राजकस्वामीभगवदाचार्यः स्वाध्यायेन स्ववैदुष्येण च बहुसफलतामवाप इति तस्य चरिताध्ययनेन ज्ञायते । तस्मात्

कारणात् स अनेकभाषानुयायिनां बहुसम्मानाभिनन्दनपत्राणाञ्चाधिकारी अभूत्। तेन आहत्य अष्टादश उपाधयः प्राप्ता इति ज्ञायते। ताः भवन्ति- 1. पण्डितराजः, 2. सारस्वतसार्वभौमः, 3. महामहिमोपाध्यायः, 4. सनातनधर्मसम्राट्, 5. भाषाकोविदः, 6. शास्त्रार्थकण्ठरवः, 7. जगद्गुरुश्रीरामानन्दाचार्योपाधिः, 8. वेदरत्नः, 9. निरुक्तभूषणम्, 10. व्याकरणशिरोमणिः, 11. साहित्यालङ्कारः, 12. तर्कपञ्चाननः, 13. वेदान्तकेसरी, 14. विद्याभास्करः, 15. वैष्णवशिरोमणिः, 16. यतिप्रवरः, 17. सर्वतन्त्रस्वतन्त्रः, 18. व्याख्यानवाचस्पतिः चेत्यादयः उपाधयः सम्प्राप्ताः ।

पूर्वोकोपाधिसमुहान् विहाय श्रीमदाचार्योऽसौ विविधानि अभिनन्दनपत्राणि नैकविधानि सम्मानानि अपि सम्प्राप्तवान् । तेन आहत्य त्रिंशत् (30) संख्यकानि सम्मानाभिनन्दनपत्राणि प्राप्तानीति तस्य जीवनचरितानुसन्धानेन प्राप्यन्ते । एवं हि परिव्राजकस्वामिश्रीमद्भगवदाचार्यः संस्कृतसाहित्यजगति एकः समुज्वलज्योतिरूपेण परिचितः आसीदित्यत्र नास्ति काऽपि विप्रतिपतिः। इति शम्।

**सन्दर्भाः-**


1. सम्मानपत्रसंग्रहः- भूमिका-पृ.-1
2. स्वामी भगवदाचार्यः- पृ.-10
3. स्वामी भगवदाचार्यः-पृ.12
4. स्वामी भगवदाचार्यः-पृ-21
5. स्वामिभगवदाचार्य, अयोध्याकाण्ड-श्लो.-2
6. भगवदाचार्यजी महाराज का जन्मतिथी दीपावली के वाद गोपञ्चमी अति है। इति वडोदायाः पञ्चमुखीहनुमानधामस्यास्य स्वामिनः रामकुमारदासस्य पत्रात् संकलितः।
7. द्रष्टव्य- भक्तिभागिरथी-श्रीरामानन्दाचार्यनिर्वाचनविशेषाङ्कः-फर्वरी-1977, पृ-10 ।
8. स्वामी भगवदाचार्य- पृ- 45
9. तत्रैव- पृ.- 52
10. ऐसा अपूर्वभाष्य मैने कभी नहीं देखा भक्तिभागिरथी- पृ-9 सम्पादकीयम्।
11. शेखरकार ने लिखा है कि ये 14 सूत्र श्रुतिरूप है, वह कथन भ्रान्त है। स्वामी भगवदाचार्य- पृ.-172
12. द्र. स्वामि भगवदाचार्यः- पृ-417
13. स्वामिभगवदाचार्यः- पृ.-417
14. भा.पा-1.15 ततः 35 श्लोकं यावत् पौराणिकी वार्ता वर्तते।
15. स्वामिभगवदाचार्यः-पृ.-34
16. तत्रैव- पृ- 90